नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 22

**S—71—Sanskrit (T.L.)**

No. of Printed Pages — 7

# माध्यमिक परीक्षा, 2015
# SECONDARY EXAMINATION, 2015

## तृतीय भाषा — संस्कृतम्

समय : $3\frac{1}{4}$ ( सपाद होरात्रयम् )

अधिकतमांकाः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।



Previous Pathshala

1. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं लिखत —

सायंकाले अस्ताचलं प्रति गच्छन् भगवान् सूर्यः चिन्तितः अभवत् — "मयि गते सम्पूर्ण संसारः अन्धकारे निमग्नः भविष्यति । लोकानां व्यवहारः कथं चलिष्यति ? मां विना सर्वे जीवाः दुःखम् अनुभविष्यन्ति ।" तस्य एतं भावं विज्ञाय एकः लघुदीपः सविनयं निवेदितवान् —"भगवान् ! अलं चिन्तया । यद्यपि मम प्रकाशः क्षीणः तथापि जनानां सेवायाम् अहं यथाशक्तिः स्वजीवनं समर्पयिष्यामि, कार्याणि च साधयिष्यामि ।

(क) एकपदेन उत्तरत —

(i) अस्ताचलं प्रतिः गच्छन् कः चिन्तितः अभवत् ? $\frac{1}{2}$

(ii) सूर्यं विना सर्वे जीवाः किम् अनुभविष्यन्ति ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

सूर्यस्य भावं विज्ञाय लघुदीपः किं निवेदितवान् ? 1

(ग) निर्देशानुसारम् उत्तरत —

(i) उपर्युक्त गद्यांशे 'सुखम्' इति पदस्य विलोमं किम् ? $\frac{1}{2}$

(ii) "मां विना सर्वे जीवाः — " अत्र 'मां' इति सर्वनामपदम् कस्मै प्रयुक्तम् ? $\frac{1}{2}$

(iii) 'लघुदीपः' अत्र विशेषणपदं किम् ? $\frac{1}{2}$

(iv) 'जनानां सेवायाम् अहं यथाशक्ति स्वजीवनं समर्पयिष्यामि' अत्र कर्त्ता कः ? $\frac{1}{2}$

2. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानामुत्तराणि यथानिर्देशं लिखत —

सरदार भगतसिंहः क्रान्तिकारिणां यूनां नेतृत्वं स्वातन्त्र्य सङ्गरे कृतवान् । सोऽमूच्चादर्शभूतो भारतीय-युव-वर्गस्य । न केवलं भगतसिंहः स्वतन्त्रता संग्रामे संलग्नः आसीत् । तस्य समग्र परिवारः स्वतन्त्रता युद्धे प्रवृत्तः आसीत् । सरदार भगतसिंहस्य जन्म-समये तस्य जनकः सरदार किशनसिंहो योऽभूत् स्वतन्त्रता-सैनिकः स कारागारे गौराङ्गैर्निपातितः । स्वतन्त्रता-सैनिकोऽस्य पितृव्यः सरदार अजीतसिंहः निर्वासीतश्चासीत् । 1907 ई० वर्षे सितम्बरमासे, लॉयलपुर मण्डले बङ्गाख्ये ग्राम सरदार भगतसिंहस्य जन्म बभूव । प्राथमिकी शिक्षा चास्य ग्रामे एवाभूत् । उच्चाध्ययनायायं लाहौर नगरं गतवान् । अध्ययन समकालमेव भगतसिंहोऽपि क्रान्तिकारिणां संसर्गे समागतः देशभक्तिभावनया सोऽध्ययनं मध्ये विहाय दिल्लीनगरं प्रत्यागच्छत् । तत्रायं 'दैनिक अर्जुन' इत्याख्ये समाचारपत्रे संवाददातृ रूपेण कार्यमकरोत् ।

(क) एकपदेन उत्तरत —

(i) सरदारः भगतसिंहः स्वातन्त्र्य सङ्गरे केषां नेतृत्वं कृतवान् ? $\frac{1}{2}$

(ii) भगतसिंहस्य जनकस्य नाम किमासीत् ? $\frac{1}{2}$

(iii) भगतसिंहेन कस्मिन् समाचारपत्रे संवाददातृ रूपेण कार्यम अकरोत् ? $\frac{1}{2}$

(iv) भगतसिंहस्य प्राथमिकी शिक्षा कुत्र अभूत ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

(i) सरदार भगतसिंहस्य पितृव्यस्य नाम किमासीत् ? 1

(ii) भगतसिंहः उच्चाध्ययनाय कुत्र गतवान् ? 1

(iii) भगतसिंह कदा क्रान्तिकारिणां संसर्गे समागतः ? 1



Previous Pathshala

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत । 1

(घ) यथानिर्देशं प्रश्नान् उत्तरत —

(i) 'सोऽभूच्चादर्शभूतो .............. '' अत्र कर्तृपदं किमस्ति ? $\frac{1}{2}$

(ii) 'प्राथमिकी शिक्षा' अत्र विशेष्यपदं किमस्ति ? $\frac{1}{2}$

(iii) ''तस्य समग्रः परिवारः स्वतन्त्रतायुद्धे प्रवृत्तः आसीत्'' अत्र 'तस्य' सर्वनामस्थाने संज्ञापद प्रयोगं कुरुत । $\frac{1}{2}$

(iv) 'परतन्त्रता' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत । $\frac{1}{2}$

3. भवान् प्रत्यूषः । भवतां राजकीय आदर्श उच्चमाध्यमिक विद्यालये संस्कृत सम्भाषण शिविरम् आयोजितमासीत् । स्वानुभवान् वर्णयन् भवान् स्वमित्रं भव्यं प्रति पत्रं लिखत । $8 \times \frac{1}{2} = 4$

**अथवा**

भवान् देवदत्तः । स्वानुजं यज्ञदत्तं प्रति अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत —

| अध्ययने, चिन्ता, तवाग्रजः, पत्रोत्तरं, नीरोगताम् , प्रसन्नाश्च, धनादेशः, चिरात् । |
|---|

जयपुर नगरात्
20/04/15

प्रिये अनुज यज्ञदत्त !

शुभाशिषाः ।

अत्र कुशलं तत्रास्तु । .................. पत्रं तव नैवाऽऽगतम् । तवाध्ययनं सम्यगेव चलतीति मन्ये । मया प्रेषितो ................. लब्धो न वा ? अत्रत्याः सर्वे जनाः स्वस्थाः .................. सन्ति । पूर्वं मातुः स्वास्थ्यं समीचीनं नासीत् परमिदानीं .................. अनुभवति । अतः मातुः विषयेऽपि .................. न कर्त्तव्या । .................. सावधानतया वर्तनीयम् । ...................... शीघ्रमेव देयम् , पत्रप्रेषणे प्रमादो नैव कर्त्तव्यः । तव स्नेहपत्रप्रतीक्षायाम् ।

.........................
देवदत्तः

4. मञ्जूषातः उचितानि पदानि चित्वा **द्वयोः** सख्योः संवादं पूरयत — $8 \times \frac{1}{2} = 4$

| स्थानान्तरणवशात् , कक्षायाम् , तव, विद्यालयात् , वससि, आगता, अहं, नवमकक्षा । |
|---|

मेघा — स्वागतं ते अस्यां .................. ।
सुधा — धन्यवादाः ।
मेघा — प्रियसखि ! किं ................ नाम ?
सुधा — मम नाम सुधा अस्ति ।
मेघा — सुधे ! कस्मात् ................ आगता असि ?
सुधा — अहं जयपुर नगरस्य केन्द्रीय विद्यालयात् आगता अस्मि ।
मेघा — अहमपि ................ पर्यन्तं तत्रैव अपठम् । पितुः ............. अत्र आगता ।
सुधा — अहमपि अनेनैव कारणेन अत्र ................ ।
मेघा — अधुना त्वं कुत्र .................. ?
सुधा — अधुना ................. जवाहरनगरे वसामि ।



Previous Pathshala

5. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दानां सहायतया ''धेनु-महिमा'' इति विषयोपरि संस्कृते अष्टवाक्यानि लिखत — $8 \times \frac{1}{2} = 4$

| |
|---|
| दुग्धदातृषु , कृषिप्रधाने, द्वौ शृंगौ, वसिष्ठ ऋषिः, अनेक वर्णाः, घासं, अमृतोपमम् , स्वभावेन । |



**अथवा**

अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा उत्तरपुस्तिकायाम् लिखत — $8 \times \frac{1}{2} = 4$

| |
|---|
| संसारे, कल्याणं, दुःखं, पवित्रं, स्वार्थतत्पराः, परेषां, प्रतिष्ठा, परमो । |

(i) ................. प्राणिनामुपकारः परोपकारोऽस्ति । (ii) ..................... परोपकारः एव स गुणो विद्यते, येन मनुष्येषु सुखस्य (iii) .................. वर्तते । परोपकारेण एव हृदयं (iv) ....................... सरलं, सरसं च भवति । सत्पुरुषाः कदापि (v) ..................... न भवन्ति । ते परेषां दुःखं स्वीयं (vi) ........................ मत्वा तन्नाशाय यतन्ते । जगतः (vii) ............... परोपकारेणैव भवति । अतएव कथ्यते – ''परोपकारः (viii) ................ धर्मः'' ।

6. पाठ्यपुस्तकात् **द्वौ** श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम् । $2 \times 2 = 4$

7. अधोलिखितेषु पदेषु सन्धिविच्छेदं **अथवा** सन्धिं कृत्वा सन्धेः नामापि लिखत —

(i) जगत् + ईशः 1

(ii) मनोहरः 1

(iii) एकैकः । 1



Previous Pathshala

8. अधोलिखितवाक्येषु रेखांकित समस्तपदानां विग्रहं **अथवा** विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत —

(i) नीलकमलं विना सरः न शोभते । 1

(ii) सः प्रतिदिनं देवालयं गच्छति । 1

(iii) पत्रं च पुष्पं च समर्पयामि । 1

9. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृतिप्रत्ययानुसारं रिक्तस्थानानि पूरयत —

(i) अस्माभि सदैव अनुशासनं .................. । ( पाल् + अनीयर् ) 1

(ii) जीवने परिश्रमस्य .................... भवति । ( महत् + त्व ) 1

(iii) तस्य माता .................. अस्ति । ( चतुर + टाप् ) 1

(iv) ................ बालकः पश्यति । ( गम् + शतृ ) 1

10. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत —

| सहसा, उच्चैः, एव, पुरा |
|---|

(i) ..................... गायति सः गायकः । 1

(ii) सदा सत्यम् ..................... विजयति । 1

(iii) ..................... संस्कृतं जनभाषा आसीत् । 1

(iv) ..................... क्रियां न विदधीत । 1

11. अधोलिखित वाक्यानां वाच्य परिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत —


(i) बालकः हसति । 1

(ii) रामेण ग्रामः गम्यते । 1

(iii) अहं वृक्षं पश्यामि । 1

(iv) तेन पाठः पठ्यते । 1

12. घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् —



(i) अस्माकं विद्यालये ................ मध्यान्तर भवति । 1

(ii) अहं प्रातः ................. उत्तिष्ठामि । 1

(iii) अविनाशः ................... अल्पाहारं करोति । 1

13. (i) 'पञ्च' इति संख्यापदस्य स्वरचितवाक्ये प्रयोगः करणीयः । 1

(ii) 12 इति संख्यां संस्कृतभाषायां शब्देषु लिखत । 1

14. अधोलिखितं वाक्यद्वयं शुद्धं कृत्वा लिखत —

(i) अस्मिन्नेव विद्यालये अहं पठन्ति । $\frac{1}{2}$

(ii) सः बालिका मम सखी अस्ति । $\frac{1}{2}$



Previous Pathshala

15. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत —

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चित् वित्तम् उपार्जितवान् । तेन स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् । एकदा सः पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः, पुत्रं, द्रष्टुं च प्रस्थितः । परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत् ।

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । निशान्धकारे प्रसृते विजनेप्रदेशे पदयात्रा न शुभावहा । एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्त्तुं कञ्चिद् गृहस्थमुपागतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

(क) एकपदेन उत्तरत —

(i) निशान्धकारे प्रसृते कुत्र पदयात्रा न शुभावहा ? $\frac{1}{2}$

(ii) भूरि परिश्रम्य कः किञ्चिद् वित्तमुपार्जितवान् ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

कः तस्मै आश्रयं प्रायच्छत् ? 1

(ग) 'करुणापरो गृही' अत्र विशेषणपदं किम् ? 1

(घ) ''तेन स्वपुत्रं एकस्मिन् ..........'' अत्र 'तेन' इति सर्वनाम स्थाने संज्ञापद प्रयोगं कुरुत । 1

(ङ) ''स बसयानं विहाय पदातिरेव प्राचलत्'' अत्र 'स' इति कर्त्तापदस्य क्रियापदं लिखत । 1

16. अधोलिखितं पद्यं पठित्वा प्रश्नान् उत्तरत —

रे रे चातक सावधान मनसा मित्र ! क्षणं श्रूयता,
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

(क) एकपदेन उत्तरत —

(i) कविः मित्रः इति शब्देन कं सम्बोधयति ? $\frac{1}{2}$

(ii) केचिद् अम्भोदाः कथं गर्जन्ति ? $\frac{1}{2}$

(ख) कविः श्रोतारं किं कारणाद् वर्जयति ? 1

(ग) 'दीनं वचः' अत्र विशेष्यपदं किम् ? 1

(घ) 'श्रूयताम्' इति क्रियापदस्य कर्तृपदं लिखत । 1

(ङ) 'केचिद्' इति सर्वनामस्थाने संज्ञापद प्रयोगः करणीयः । 1

17. अधोलिखितं नाट्यांशं पठित्वा एतदाधारित प्रश्नानामुत्तराणि यथानिर्देशं लिखत —

चाणक्यः — भो श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं न नन्द राज्यम् । नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव ।

चन्दनदासः — ( सहर्षम् ) आर्य ! अनुगृहीतोऽस्मि ।

चाणक्यः — भो श्रेष्ठिन् ! स च अपरिक्लेशः कथम् आविर्भवति इति ननु भवता प्रष्टव्याः स्मः ।

चन्दनदासः — आज्ञापयतु आर्यः ।

चाणक्यः — राजनि अविरुद्धवृत्तिर्भव ।

चन्दनदासः — आर्य ! कः पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते ?

चाणक्यः — भवानेव तावत् प्रथमम् ।

चन्दनदासः — ( कर्णौ पिधाय ) शान्तं पापम् । कीदृशः तृणानामग्निना सह विरोधः ?



Previous Pathshala

(क) एकपदेन उत्तरत —

(i) चाणक्यानुसारं चन्दनदासः राजानं प्रति कीदृशः भवितव्यः ? $\frac{1}{2}$

(ii) केन चन्दनदासो राज्ञो विरुद्ध इति अवगम्यते ? $\frac{1}{2}$

(ख) पूर्णवाक्येन उत्तरत —

चन्दनदासेन चाणक्यः किं प्रष्टव्यः ? 1

(ग) 'सविषादम्' इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत । 1

(घ) 'उत्पादयति' इति क्रियापदस्य कर्तृपदं किम् ? 1

(ङ) 'भवानेव तावत् प्रथमम्' अत्र 'भवान्' इति सर्वनामस्थाने संज्ञापद प्रयोगं कुरुत । 1

18. "विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्" समभाव सूक्तिमाध्यमेन इत्यस्य भावबोधनं सरल संस्कृतभाषायां लिखत । 2

19. वयोबल शरीराणि देशकालाशनानि च ।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात् ॥
उपर्युक्त श्लोकस्यान्वयमाश्रित्य रिक्तस्थानानि पूरयत — $4 \times \frac{1}{2} = 2$

(i) ..................... देशकाल-अशनानि च (ii) .................... व्यायामं

(iii) ........................... अन्यथा (iv) ........................ आप्नुयात् ।

20. रेखांकित पदमाधृत्य प्रश्ननिर्माणं कुरुत —

(i) शृगालेन पुः त्रय व्याघ्राः आनीय दत्ता । 1

(ii) समानशील व्यसनेषु सख्यं भवति । 1

(iii) राजहंसेन सरसः शोभा भवेत् । 1

21. अधोलिखितानि वाक्यानि क्रमरहितानि । यथाक्रमं संयोजनं कृत्वा लिखत — $6 \times \frac{1}{2} = 3$

(i) स च विभव क्षयाद्देशान्तरं गन्तुमिच्छति ।

(ii) आसीद् कश्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः ।

(iii) तां च कस्यचिद् श्रेष्ठिनो गृहे निक्षेपभूतां कृत्वा देशान्तरं प्रस्थितः ।

(iv) तस्य च गृहे लोहघटिता पूर्व पुरुषोपार्जिता तुलासीत् ।

(v) स आह — "भोः ! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति ।

(vi) ततः सुचिरं ... कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच — "भो श्रेष्ठिन् ! दीयतां मे सा निक्षेपतुला ।"

22. **'क' स्तम्भे** पदानि दत्तानि । **'ख' स्तम्भे** क्रमरहिताः तेषां समानार्थक शब्दाः दत्ताः । उचितं मेलनं कृत्वा लिखत — $6 \times \frac{1}{2} = 3$

| | **'क'** | **'ख'** |
|---|---|---|
| (i) | भोजनम् | ग्रीष्मकाले |
| (ii) | मुदितः | असत्यम् |
| (iii) | निदाघे | अशनम् |
| (iv) | अलीकम् | इच्छानुसारम् |
| (v) | यथेष्टम् | विद्वान् |
| (vi) | पण्डितः | प्रसन्नः । |



Previous Pathshala